

# सरस्वती स्तोत्रम्

Temples.bio

आसानी से सरस्वती स्तोत्रम् सीखें और जप करें

www.temples.bio/s-26

या कुंदेंदु तुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदंडमंडितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युत शंकरप्रभृतिभिर्देवैस्सदा पूजिता
सा मां पातु सरस्वती भगवती निश्शेषजाड्यापहा ॥ 1 ॥

दोर्भिर्युक्ता चतुर्भिः स्फटिकमणिनिभै रक्षमालांदधाना
हस्तेनैकेन पद्मं सितमपिच शुकं पुस्तकं चापरेण ।
भासा कुंदेंदुशंखस्फटिकमणिनिभा भासमानाzसमाना
सा मे वाग्देवतेयं निवसतु वदने सर्वदा सुप्रसन्ना ॥ 2 ॥

सुरासुरैस्सेवितपादपंकजा करे विराजत्कमनीयपुस्तका ।
विरिंचिपत्नी कमलासनस्थिता सरस्वती नृत्यतु वाचि मे सदा ॥ 3 ॥

सरस्वती सरसिजकेसरप्रभा तपस्विनी सितकमलासनप्रिया ।
घनस्तनी कमलविलोललोचना मनस्विनी भवतु वरप्रसादिनी ॥ 4 ॥

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारंभं करिष्यामि सिद्धिर्भवतु मे सदा ॥ 5 ॥

सरस्वति नमस्तुभ्यं सर्वदेवि नमो नमः ।
शांतरूपे शशिधरे सर्वयोगे नमो नमः ॥ 6 ॥

नित्यानंदे निराधारे निष्कलायै नमो नमः ।
विद्याधरे विशालाक्षि शुद्धज्ञाने नमो नमः ॥ 7 ॥

शुद्धस्फटिकरूपायै सूक्ष्मरूपे नमो नमः ।
शब्दब्रह्मि चतुर्हस्ते सर्वसिद्ध्यै नमो नमः ॥ 8 ॥

मुक्तालंकृत सर्वांग्यै मूलाधारे नमो नमः ।
मूलमंत्रस्वरूपायै मूलशक्त्यै नमो नमः ॥ 9 ॥

मनोन्मनि महाभोगे वागीश्वरि नमो नमः ।
वाग्म्यै वरदहस्तायै वरदायै नमो नमः ॥ 10 ॥

वेदायै वेदरूपायै वेदांतायै नमो नमः ।
गुणदोषविवर्जिन्यै गुणदीप्त्यै नमो नमः ॥ 11 ॥

सर्वज्ञाने सदानंदे सर्वरूपे नमो नमः ।
संपन्नायै कुमार्यै च सर्वज्ञे ते नमो नमः ॥ 12 ॥

योगानार्य उमादेव्यै योगानंदे नमो नमः ।
दिव्यज्ञान त्रिनेत्रायै दिव्यमूर्त्यै नमो नमः ॥ 13 ॥

अर्धचंद्रजटाधारि चंद्रबिंबे नमो नमः ।
चंद्रादित्यजटाधारि चंद्रबिंबे नमो नमः ॥ 14 ॥

अणुरूपे महारूपे विश्वरूपे नमो नमः ।
अणिमाद्यष्टसिद्धायै आनंदायै नमो नमः ॥ 15 ॥

ज्ञान विज्ञान रूपायै ज्ञानमूर्ते नमो नमः ।
नानाशास्त्र स्वरूपायै नानारूपे नमो नमः ॥ 16 ॥

पद्मजा पद्मवंशा च पद्मरूपे नमो नमः ।
परमेष्ठ्यै परामूर्त्यै नमस्ते पापनाशिनी ॥ 17 ॥

महादेव्यै महाकाल्यै महालक्ष्म्यै नमो नमः ।
ब्रह्मविष्णुशिवायै च ब्रह्मनार्यै नमो नमः ॥ 18 ॥

कमलाकरपुष्पा च कामरूपे नमो नमः ।
कपालिकर्मदीप्तायै कर्मदायै नमो नमः ॥ 19 ॥

सायं प्रातः पठेन्नित्यं षण्मासात्सिद्धिरुच्यते ।
चोरव्याघ्रभयं नास्ति पठतां शृण्वतामपि ॥ 20 ॥

इत्थं सरस्वती स्तोत्रमगस्त्यमुनि वाचकम् ।
सर्वसिद्धिकरं नृणां सर्वपापप्रणाशनम् ॥ 21 ॥



Temples.bio
आसानी से सरस्वती स्तोत्रम् सीखें और जप करें
www.temples.bio/s-26